# Shri Ganesha Stuti Vrindakrita

# વૃન્દાકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Vrindakrita

File name : gaNeshastutiHvRRindAkRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 32 | 5.32. 5-25||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 5, 2024

*sanskritdocuments.org*

# વૃન્દાકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
વૃન્દોવાચ ।
નમસ્તે વિઘ્નરાજાય ભક્તવિઘ્નહરાય ચ ।
અભક્તેભ્યો વિશેષેણ વિઘ્નદાય નમો નમઃ ॥ ૫॥
પરેશાય પરાણાં તે પરાત્પરતરાય ચ ।
ભક્તેશાય સદા ભક્તિપ્રિયાય તે નમો નમઃ ॥ ૬॥
બ્રહ્મેશાય ગણાધીશ બ્રહ્મણાં બ્રહ્મરૂપિણે ।
બ્રહ્મણાં પતયે તુભ્યં ગણાધિપતયે નમઃ ॥ ૭॥
અમેયાયાપ્રતર્ક્યાય સદા સ્વાનન્દવાસિને ।
શિવવિષ્ણુમુખેભ્યશ્ચ પદદાત્રે નમો નમઃ ॥ ૮॥
અનાથાય ચ સર્વેષાં નાથાય પરમાત્મને ।
વક્રતુણ્ડાય સર્વેષામાદિપૂજ્યાય તે નમઃ ॥ ૯॥
વિનાયકાય વીરાય શૂર્પકર્ણાય ઢુણ્ઢયે ।
ગજાનનાય ચિન્તામણયે હેરમ્બ તે નમઃ ॥ ૧૦॥
અનન્તગુણધારાય નાનાખેલકરાય તે ।
પરેષાં તુ પરેશાય મૂષકધ્વજિને નમઃ ॥ ૧૧॥
પૂર્ણાનન્દાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ।
જ્યેષ્ઠેભ્યો જ્યેષ્ઠરાજાય જ્યેષ્ઠપદપ્રદાયિને ॥ ૧૨॥
કિં સ્તૌમિ ત્વાં ગણાધીશ યોગાકારં પરાત્પરમ્ ।
અતસ્ત્વાં પ્રણમામ્યેવં તેન તુષ્ટો ભવ પ્રભો ॥ ૧૩॥
ગાણેશં દેહિ મે યોગં ગાણપત્યાં ચ માં કુરુ ।
ક્ષમસ્વ મેઽપરાધં ત્વં ત્વદુલ્લઙ્ઘનભાવજમ્ ॥ ૧૪॥
અન્યત્ત્વં માં ગણાધીશ માન્યાં કુરુ ત્વદીયકે ।
પૂજને કિઞ્ચિદલ્પેન ભાવેન વરદાયક ॥ ૧૫॥
ક્વાઽહં તે સમતાં નાથ સમ્પ્રાપ્નોમિ કદાપિ ન ।

તથા તપોમદેનૈતત્ કૃતં ક્ષન્તું ત્વમર્હસિ ॥ ૧૬॥
એવં સ્તુત્વા ગણાધીશં પ્રણનામ પ્રજાપતે ।
વૃન્દા તાં પ્રત્યુવાચેદં વાક્યં વાક્યવિશારદઃ ॥ ૧૭॥
(ફલશ્રુતિઃ)
શ્રીગણેશ ઉવાચ ।
મદીયં યોગમાદ્યં ત્વં પ્રાપ્સ્યસે નાત્ર સંશયઃ ।
ગાણપત્યા મહાભાગે ભવિષ્યસિ સદા સુતે ॥ ૧૮॥
ભાદ્રશુક્લચતુર્થ્યાં યે મહોત્સવપરાયણાઃ ।
પૂજયિષ્યન્તિ માં ભક્ત્યા તત્ર ત્વાં ધારયામ્યહમ્ ॥ ૧૯॥
એકવિંશતિપત્રાણિ હ્યર્પયિષ્યન્તિ માનવાઃ ।
તત્ર તે પત્રમેકં મે માન્યં દેવિ ભવિષ્યતિ ॥ ૨૦॥
ઉલ્લઙ્ઘનસમં પાપં ન ભૂતં ન ભવિષ્યતિ ।
સ્વલ્પોલ્લઙ્ઘનમાત્રેણ ત્વં ત્યક્તા ચ મયા સદા ॥ ૨૧॥
યે મામુલ્લઙ્ઘયિષ્યન્તિ તાંસ્ત્યજામિ નિરન્તરમ્ ।
તત્રાપિ તપસા બદ્ધો વૃન્દે ત્વાં માનયામ્યહમ્ ॥ ૨૨॥
ત્વયા કૃતમિદં સ્તોત્રં ભુક્તિમુક્તિપ્રદં ભવેત્ ।
બ્રહ્મભૂયપ્રદં પૂર્ણં પઠતે શ‍ૃણ્વતે સદા ॥ ૨૩॥
તુલસીં યે નરા મહ્યમર્પયન્તિ કદા સુતે ।
તત્પાપહરણં સ્તોત્રં ભવિષ્યતિ કૃતં ત્વયા ॥ ૨૪॥
ઉલ્લઙ્ઘનાદ્યહં નિત્યં ભવિષ્યતિ વિશેષતઃ ।
અનેન સ્તુવતાં નિત્યં ન સર્વં દુર્લભં ભવેત્ ॥ ૨૫॥

ઇતિ વૃન્દાકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૩૨ । ૫.૩૨। ૫-૨૫॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 32 . 5.32. 5-25..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Vrindakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*